श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ नवाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ नवाधिकशततमः सर्गः ॥

## श्रीरामकर्तृकं जाबालिमुनेर्नास्तिकमतं निरस्यास्तिकमतस्य स्थापनम्

जाबालेस्तु वचः श्रुत्वा रामः सत्यपराक्रमः।
उवाच परया सूक्त्या बुद्ध्याविप्रतिपन्नया ॥ **2.109.1** ॥

भवान् मे प्रियकामार्थं वचनं यदिहोक्तवान्।
अकार्यं कार्यसङ्काशमपथ्यं पथ्यसन्निभम् ॥ **2.109.2** ॥

निर्मर्यादस्तु पुरुषः पापाचारसमन्वितः।
मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥ **2.109.3** ॥

कुलीनमकुलीनं वा वीरं पुरुषमानिनम्।
चारित्रमेव व्याख्याति शुचिं वा यदि वाशुचिम् ॥ **2.109.4** ॥

अनार्यस्त्वार्यसंस्थानः शौचाद्धीनस्तथा शुचिः।
लक्षण्यवदलक्षण्यो दुःशीलः शीलवानिव ॥ **2.109.5** ॥

अधर्मं धर्मवेषेण यद्यहं लोकसङ्करम्।
अभिपत्स्ये शुभं हित्वा क्रियां विधिविवर्जिताम् ॥ **2.109.6** ॥

कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः।
बहु मन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥ **2.109.7** ॥

कस्य यास्याम्यहं वृत्तं केन वा स्वर्गमाप्नुयाम्।
अनया वर्तमानोऽहं वृत्त्या हीनप्रतिज्ञया॥ **2.109.8** ॥

कामवृत्तोऽन्वयं लोकः कृत्स्नः समुपवर्तते।
यद्वृत्ताः सन्ति राजानस्तद्वृत्ताः सन्ति हि प्रजाः॥ **2.109.9** ॥

सत्यमेवानृशंसं च राजवृत्तं सनातनम्।
तस्मात् सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः॥ **2.109.10** ॥

ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे।
सत्यवादी हि लोकेऽस्मिन् परं गच्छति चाक्षयम्॥ **2.109.11** ॥

उद्विजन्ते यथा सर्पान्नरादनृतवादिनः।
धर्मः सत्यपरो लोके मूलं सर्वस्य चोच्यते॥ **2.109.12** ॥

सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्॥ **2.109.13** ॥

दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च।
वेदाः सत्यप्रतिष्ठानास्तस्मात् सत्यपरो भवेत्॥ **2.109.14** ॥

एकः पालयते लोकमेकः पालयते कुलम्।
मज्जत्येको हि निरय एकः स्वर्गे महीयते॥ **2.109.15** ॥

सोऽहं पितुर्निदेशं तु किमर्थं नानुपालये।
सत्यप्रतिश्रवः सत्यं सत्येन समयीकृतम्॥ **2.109.16** ॥

नैव लोभान्न मोहाद् वा न चाज्ञानात् तमोऽन्वितः।
सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः॥ **2.109.17** ॥

असत्यसन्धस्य सतश्चलस्यास्थिरचेतसः।
नैव देवा न पितरः प्रतीच्छन्तीति नः श्रुतम्॥ **2.109.18** ॥

प्रत्यगात्ममिमं धर्मं सत्यं पश्याम्यहं ध्रुवम्।
भारः सत्पुरुषैश्चीर्णस्तदर्थमभिनन्द्यते॥ **2.109.19** ॥

क्षात्रं धर्ममहं त्यक्ष्ये ह्यधर्मं धर्मसंहितम्।
क्षुद्रैर्नृशंसैर्लुब्धैश्च सेवितं पापकर्मभिः॥ **2.109.20** ॥

कायेन कुरुते पापं मनसा सम्प्रधार्य तत्।
अनृतं जिह्वया चाह त्रिविधं कर्म पातकम्॥ **2.109.21** ॥

भूमिः कीर्तिर्यशो लक्ष्मीः पुरुषं प्रार्थयन्ति हि।
सत्यं समनुवर्तन्ते सत्यमेव भजेत् ततः॥ **2.109.22** ॥

श्रेष्ठं ह्यनार्यमेव स्याद् यद् भवानवधार्य माम्।
आह युक्तिकरैर्वाक्यैरिदं भद्रं कुरुष्व ह॥ **2.109.23** ॥

कथं ह्यहं प्रतिज्ञाय वनवासमिमं गुरोः।
भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः॥ **2.109.24** ॥

स्थिरा मया प्रतिज्ञाता प्रतिज्ञा गुरुसन्निधौ।
प्रहृष्टमानसा देवी कैकेयी चाभवत् तदा॥ **2.109.25** ॥

वनवासं वसन्नेव शुचिर्नियतभोजनः।
मूलपुष्पफलैः पुण्यैः पितॄन् देवांश्च तर्पयन्॥ **2.109.26** ॥

सन्तुष्टपञ्चवर्गोऽहं लोकयात्रां प्रवाहये।
अकुहः श्रद्दधानः सन् कार्याकार्यविचक्षणः॥ **2.109.27** ॥

कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम्।
अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः॥ **2.109.28** ॥

शतं क्रतूनामाहृत्य देवराट् त्रिदिवं गतः।
तपांस्युग्राणि चास्थाय दिवं प्राप्ता महर्षयः॥ **2.109.29** ॥

अमृष्यमाणः पुनरुग्रतेजा
 निशम्य तन्नास्तिकवाक्यहेतुम्।
अथाब्रवीत् तं नृपतेस्तनूजो
 विगर्हमाणो वचनानि तस्य॥ **2.109.30** ॥

सत्यं च धर्मं च पराक्रमं च
 भूतानुकम्पां प्रियवादितां च।
द्विजातिदेवातिथिपूजनं च
 पन्थानमाहुस्त्रिदिवस्य सन्तः॥ **2.109.31** ॥

तेनैवमाज्ञाय यथावदर्थ -
 मेकोदयं सम्प्रतिपद्य विप्राः।
धर्मं चरन्तः सकलं यथावत्
 काङ्क्षन्ति लोकागममप्रमत्ताः॥ **2.109.32** ॥

निन्दाम्यहं कर्म कृतं पितुस्तद्
 यस्त्वामगृह्णाद् विषमस्थबुद्धिम्।
बुद्ध्यानयैवंविधया चरन्तं
 सुनास्तिकं धर्मपथादपेतम्॥ **2.109.33** ॥

यथा हि चोरः स तथा हि बुद्ध -
 स्तथागतं नास्तिकमत्र विद्धि।
तस्माद्धि यः शक्यतमः प्रजानां
 स नास्तिके नाभिमुखो बुधः स्यात्॥ **2.109.34** ॥

त्वत्तो जनाः पूर्वतरे द्विजाश्च
 शुभानि कर्माणि बहूनि चक्रुः।
छित्त्वा सदेमं च परं च लोकं
 तस्माद् द्विजाः स्वस्ति कृतं हुतं च॥ **2.109.35** ॥

धर्मे रताः सत्पुरुषैः समेता -
    स्तेजस्विनोदानगुणप्रधानाः।
अहिंसका वीतमलाश्च लोके
    भवन्ति पूज्या मुनयः प्रधानाः ॥ **2.109.36** ॥

इति ब्रुवन्तं वचनं सरोषं
    रामं महात्मानमदीनसत्त्वम्।
उवाच पथ्यं पुनरास्तिकं च
    सत्यं वचः सानुनयं च विप्रः ॥ **2.109.37** ॥

न नास्तिकानां वचनं ब्रवीम्यहं
    न नास्तिकोऽहं न च नास्ति किञ्चन।
समीक्ष्य कालं पुनरास्तिकोऽभवं
    भवेय काले पुनरेव नास्तिकः ॥ **2.109.38** ॥

स चापि कालोऽयमुपागतः शनै -
    र्यथा मया नास्तिकवागुदीरिता।
निवर्तनार्थं तव राम कारणात्
    प्रसादनार्थं च मयैतदीरितम् ॥ **2.109.39** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे नवाधिकशततमः सर्गः ॥